# শ্রীগোপালসহস্রনামস্তোত্র

{॥ শ্রীগোপালসহস্রনামস্তোত্র ॥}

পার্বত্যুবাচ-

কৈলাসশিখরে রম্যে গৌরী পৃচ্ছতি শঙ্করম্ ।

ব্রহ্মাণ্ডাখিলনাথস্ত্বং সৃষ্টিসংহারকারকঃ ॥ ১॥

ত্বমেব পূজ্যসে লোকৈর্ব্রহ্মবিষ্ণুসুরাদিভিঃ ।

নিত্যং পঠসি দেবেশ কস্য স্তোত্রং মহেশ্বর ॥ ২॥

আশ্চর্যমিদমাখ্যানং জাযতে মযি শঙ্কর ।

তৎপ্রাণেশ মহাপ্রাজ্ঞ সংশযং ছিন্ধি মে প্রভো ॥ ৩॥

শ্রীমহাদেব উবাচ-

ধন্যাসি কৃতপুণ্যাসি পার্বতি প্রাণবল্লভে ।

রহস্যাতিরহস্যং চ যৎপৃচ্ছসি বরাননে ॥ ৪॥

স্ত্রীস্বভাবান্মহাদেবি পুনস্ত্বং পরিপৃচ্ছসি ।

গোপনীযং গোপনীযং গোপনীযং প্রযত্নতঃ ॥ ৫॥

দত্তে চ সিদ্ধিহানিঃ স্যাত্তস্মাদ্যত্নেন গোপযেত্ ।

ইদং রহস্যং পরমং পুরুষার্থপ্রদাযকম্ ॥ ৬॥

ধনরত্নৌঘমাণিক্যং তুরঙ্গং চ গজাদিকম্ ।
দদাতি স্মরণাদেব মহামোক্ষপ্রদাযকম্ ॥ ৭॥

তত্তেঽহং সম্প্রবক্ষ্যামি শৃণুষ্বাবহিতা প্রিযে ।
যোঽসৌ নিরঞ্জনো দেবঃ চিৎস্বরূপী জনার্দনঃ ॥ ৮॥

সংসারসাগরোত্তারকারণায নৃণাম্ সদা ।
শ্রীরঙ্গাদিকরূপেণ ত্রৈলোক্যং ব্যাপ্য তিষ্ঠতি ॥ ৯॥

ততো লোকা মহামূঢা বিষ্ণুভক্তিবিবর্জিতাঃ ।
নিশ্চযং নাধিগচ্ছন্তি পুনর্নারাযণো হরিঃ ॥ ১০॥

নিরঞ্জনো নিরাকারো ভক্তানাং প্রীতিকামদঃ ।
বৃন্দাবনবিহারায গোপালং রূপমুদ্বহন্ ॥ ১১॥

মুরলীবাদনাধারী রাধাযৈ প্রীতিমাবহন্ ।
অংশাংশেভ্যঃ সমুন্মীল্য পূর্ণরূপকলাযুতঃ ॥ ১২॥

শ্রীকৃষ্ণচন্দ্রো ভগবান্ নন্দগোপবরোদ্যতঃ ।
ধরণীরূপিণীমাতৃযশোদানন্দদাযকঃ ॥ ১৩॥

দ্বাভ্যাং প্রযাচিতো নাথো দেবক্যাং বসুদেবতঃ ।

ব্রহ্মণাঽভ্যর্থিতো দেবো দেবৈরপি সুরেশ্বরি ॥ ১৪॥

জাতোঽবন্যাং মুকুন্দোঽপি মুরলোবেদরেচিকা ।

তয়া সার্দ্ধং বচঃ কৃত্বা ততো জাতো মহীতলে ॥ ১৫॥

সংসারসারসর্বস্বং শ্যামলং মহদুজ্জ্বলম্ ।

এতজ্জ্যোতিরহং বেদ্যং চিন্তযামি সনাতনম্ ॥ ১৬॥

গৌরতেজো বিনা যস্তু শ্যামতেজস্সমর্চযেত্ ।

জপেদ্বা ধ্যাযতে বাপি স ভবেত্ পাতকী শিবে ॥ ১৭॥

স ব্রহ্মহা সুরাপী চ স্বর্ণস্তেযী চ পঞ্চমঃ ।

এতৈর্দোষৈর্বিলিপ্যেত তেজোভেদান্মহীশ্বরি ॥ ১৮॥

তস্মাজ্জ্যোতিরভূদ্ দ্বেধা রাধামাধবরূপকম্ ।

তস্মাদিদং মহাদেবি গোপালেনৈব ভাষিতম্ ॥ ১৯॥

দুর্বাসসো মুনের্মোহে কার্তিক্যাং রাসমণ্ডলে ।

ততঃ পৃষ্টবতী রাধা সন্দেহভেদমাত্মনঃ ॥ ২০॥

নিরঞ্জনাৎসমুৎপন্নং মযাঽধীতং জগন্ময়ি ।

শ্রীকৃষ্ণেন ততঃ প্রোক্তং রাধাযৈ নারদায চ ॥ ২১॥

ততো নারদতস্সর্বে বিরলা বৈষ্ণবা জনাঃ ।

কলৌ জানন্তি দেবেশি গোপনীয়ং প্রযত্নতঃ ॥ ২২॥

শঠায কৃপণাযাথ দাম্ভিকায সুরেশ্বরি ।

ব্রহ্মহত্যামবাপ্নোতি তস্মাদ্যত্নেন গোপযেত্ ॥ ২৩॥

পাঠ করনে কী বিধি

ওঁ অস্য শ্রীগোপালসহস্রনামস্তোত্রমহামন্ত্রস্য শ্রীনারদ ঋষিঃ ।

অনুষ্টুপ্ ছন্দঃ । শ্রীগোপালো দেবতা । কামো বীজম্ । মাযা শক্তিঃ ।

চন্দ্রঃ কীলকম্ শ্রীকৃষ্ণচন্দ্র ভক্তিরূপফলপ্রাপ্তযে

শ্রীগোপালসহস্রনামস্তোত্রজপে বিনিযোগঃ ।

যা ইসতরহ করেং পাঠ

ওঁ ঐং ক্লীং বীজম্ । শ্রীং হ্রীং শক্তিঃ ।

শ্রীবৃন্দাবননিবাসঃ কীলকম্ ।

শ্রীরাধাপ্রিযপরব্রহ্মেতি মন্ত্রঃ ।

ধর্মাদিচতুর্বিধপুরুষার্থসিদ্ধ্যর্থে জপে বিনিযোগঃ ॥

অথ করাদিন্যাসঃ

ওঁ ক্লাং অঙ্গুষ্ঠাভ্যাং নমঃ ।

ওঁ ক্লীং তর্জনীভ্যাং নমঃ ॥

ওঁ ক্লূং মধ্যমাভ্যাং নমঃ ॥

Stotram Digitalized By Sanskritdocuments.org

ওঁ ক্লৈং অনামিকাভ্যাং নমঃ ॥

ওঁ ক্লৌং কনিষ্ঠিকাভ্যাং নমঃ ॥

ওঁ ক্লঃ করতলকরপৃষ্ঠাভ্যাং নমঃ ॥

অথ হৃদযাদিন্যাসঃ

ওঁ ক্লাং হৃদযায নমঃ ।

ওঁ ক্লীং শিরসে স্বাহা ॥

ওঁ ক্লূং শিখাযৈ বষট্ ॥

ওঁ ক্লৈং কবচায হুং ॥

ওঁ ক্লৌং নেত্রত্রযায বৌষট্ ॥

ওঁ ক্লঃ অস্ত্রায ফট্ ॥

অথ ধ্যানম্

কস্তূরীতিলকং ললাটপটলে বক্ষঃস্থলে কৌস্তুভং

নাসাগ্রেবরমৌক্তিকং করতলে বেণুং করে কঙ্কণম্ ॥

সর্বাঙ্গে হরিচন্দনং সুললিতং কণ্ঠে চ মুক্তাবলিম্

গোপস্ত্রীপরিবেষ্টিতো বিজয়তে গোপালচূডামণিঃ ॥ ১॥

ফুল্লেন্দীবরকান্তিমিন্দুবদনং বর্হাবতংসপ্রিয়ং

শ্রীবৎসাঙ্কমুদারকৌস্তুভধরং পীতাম্বরং সুন্দরম্ ॥

গোপীনাং নয়নোৎপলার্চিততনুং গোগোপসঙ্ঘাবৃতং

গোবিন্দং কলবেণুবাদনপরং দিব্যাঙ্গভূষং ভজে ॥ ২॥

সহস্রনাম স্তোত্র আরম্ভ-

ॐ ক্লীং দেবঃ কামদেবঃ কামবীজশিরোমণিঃ ।

শ্রীগোপালো মহীপালো সর্ববেদান্তপারগঃ ॥ ১॥

কৃষ্ণঃ কমলপত্রাক্ষঃ পুণ্ডরীকঃ সনাতনঃ ।

গোপতির্ভূপতিঃ শাস্তা প্রহর্তা বিশ্বতোমুখঃ ॥ ২॥

আদিকর্তা মহাকর্তা মহাকালঃ প্রতাপবান্ ।

জগজ্জীবো জগদ্ধাতা জগদ্ভর্তা জগদ্বসুঃ ॥ ৩॥

মৎস্যো ভীমঃ কুহূভর্তা হর্তা বারাহমূর্তিমান্ ।

নারায়ণো হৃষীকেশো গোবিন্দো গরুডধ্বজঃ ॥ ৪॥

গোকুলেন্দ্রো মহীচন্দ্রঃ শর্বরীপ্রিযকারকঃ ।

কমলামুখলোলাক্ষঃ পুণ্ডরীকঃ শুভাবহঃ ॥ ৫॥

দুর্বাসাঃ কপিলো ভৌমঃ সিন্ধুসাগরসঙ্গমঃ ।

গোবিন্দো গোপতির্গোপঃ কালিন্দীপ্রেমপূরকঃ ॥ ৬॥

গোপস্বামী গোকুলেন্দ্রো গোবর্ধনবরপ্রদঃ ।

নন্দাদিগোকুলত্রাতা দাতা দারিদ্র্যভঞ্জনঃ ॥ ৭॥

সর্বমঙ্গলদাতা চ সর্বকামপ্রদাযকঃ ।

আদিকর্তা মহীভর্তা সর্বসাগরসিন্ধুজঃ ॥ ৮॥

গজগামী গজোদ্ধারী কামী কামকলানিধিঃ ।

কলঙ্করহিতশ্চন্দ্রো বিম্বাস্যো বিম্বসত্তমঃ ॥ ৯॥

মালাকারঃ কৃপাকারঃ কোকিলস্বরভূষণঃ ।

রামো নীলাম্বরো দেবো হলী দুর্দমমর্দনঃ ॥ ১০॥

সহস্রাক্ষপুরীভেত্তা মহামারীবিনাশনঃ ।

শিবঃ শিবতমো ভেত্তা বলারাতিপ্রপূজকঃ ॥ ১১॥

কুমারীবরদাযী চ বরেণ্যো মীনকেতনঃ ।

নরো নারাযণো ধীরো রাধাপতিরুদারধীঃ ॥ ১২॥

শ্রীপতিঃ শ্রীনিধিঃ শ্রীমান্ মাপতিঃ প্রতিরাজহা ।

বৃন্দাপতিঃ কুলগ্রামী ধামী ব্রহ্ম সনাতনঃ ॥ ১৩॥

রেবতীরমণো রামঃ প্রিযশ্চঞ্চললোচনঃ ।

রামাযণশরীরোঽযং রামো রামঃ শ্রিযঃপতিঃ ॥ ১৪॥

শর্বরঃ শর্বরী শর্বঃ সর্বত্র শুভদাযকঃ ।

রাধারাধযিতারাধী রাধাচিত্তপ্রমোদকঃ ॥ ১৫॥

রাধারতিসুখোপেতঃ রাধামোহনতৎপরঃ ।

রাধাবশীকরো রাধাহৃদযাম্ভোজষট্পদঃ ॥ ১৬॥

রাধালিঙ্গনসম্মোহঃ রাধানর্তনকৌতুকঃ ।

রাধাসঞ্জাতসম্প্রীতো রাধাকাম্যফলপ্রদঃ ॥ ১৭॥

বৃন্দাপতিঃ কোশনিধিঃ কোকশোকবিনাশনঃ ।

চন্দ্রাপতিঃ চন্দ্রপতিঃ চণ্ডকোদণ্ডভঞ্জনঃ ॥ ১৮॥

রামো দাশরথী রামঃ ভৃগুবংশসমুদ্ভবঃ ।

আত্মারামো জিতক্রোধো মোহো মোহান্ধভঞ্জনঃ ॥ ১৯॥

বৃষভানুভবো ভাবঃ কাশ্যপিঃ করুণানিধিঃ ।

কোলাহলো হলী হালী হেলী হলধরপ্রিয়ঃ ॥ ২০॥

রাধামুখাব্জমার্তাণ্ডঃ ভাস্করো রবিজা বিধুঃ ।

বিধির্বিধাতা বরুণো বারুণো বারুণীপ্রিয়ঃ ॥ ২১॥

রোহিণীহৃদযানন্দো বসুদেবাত্মজো বলী ।

নীলাম্বরো রৌহিণেযো জরাসন্ধবধোঽমলঃ ॥ ২২॥

নাগো নবাম্ভো বিরুদো বীরহা বরদো বলী ।

গোপথো বিজযী বিদ্বান্ শিপিবিষ্টঃ সনাতনঃ ॥ ২৩॥

পরশুরামবচোগ্রাহী বরগ্রাহী শৃগালহা ।

দমঘোষোপদেষ্টা চ রথগ্রাহী সুদর্শনঃ ॥ ২৪॥

বীরপত্নীযশস্ত্রাতা জরাব্যাধিবিঘাতকঃ ।

দ্বারকাবাসতত্ত্বজ্ঞঃ হুতাশনবরপ্রদঃ ॥ ২৫॥

যমুনাবেগসংহারী নীলাম্বরধরঃ প্রভুঃ ।

বিভুঃ শরাসনো ধন্বী গণেশো গণনাযকঃ ॥ ২৬॥

লক্ষ্মণো লক্ষণো লক্ষ্যো রক্ষোবংশবিনাশনঃ ।

বামনো বামনীভূতোঽবামনো বামনারুহঃ ॥ ২৭॥

যশোদানন্দনঃ কর্ত্তা যমলার্জুনমুক্তিদঃ ।
উলূখলী মহামানী দামবদ্ধাহ্বয়ী শমী ॥ ২৮॥

ভক্তানুকারী ভগবান্ কেশবো বলধারকঃ ।
কেশিহা মধুহা মোহী বৃষাসুরবিঘাতকঃ ॥ ২৯॥

অঘাসুরবিনাশী চ পূতনামোক্ষদায়কঃ ।
কুব্জাবিনোদী ভগবান্ কংসমৃত্যুর্মহামখী ॥ ৩০।

অশ্বমেধো বাজপেয়ো গোমেধো নরমেধবান্ ।
কন্দর্পকোটিলাবণ্যশ্চন্দ্রকোটিসুশীতলঃ ॥ ৩১॥

রবিকোটিপ্রতীকাশো বায়ুকোটিমহাবলঃ ।
ব্রহ্মা ব্রহ্মাণ্ডকর্তা চ কমলাবাঞ্ছিতপ্রদঃ ॥ ৩২॥

কমলা কমলাক্ষশ্চ কমলামুখলোলুপঃ ।
কমলাব্রতধারী চ কমলাভঃ পুরন্দরঃ ॥ ৩৩॥

সৌভাগ্যাধিকচিত্তোঽয়ং মহামায়ী মদোৎকটঃ ।
তারকারিঃ সুরত্রাতা মারীচক্ষোভকারকঃ ॥ ৩৪॥

বিশ্বামিত্রপ্রিয়ো দান্তো রামো রাজীবলোচনঃ ।
লঙ্কাধিপকুলধ্বংসী বিভীষণবরপ্রদঃ ॥ ৩৫॥

সীতানন্দকরো রামো বীরো বারিধিবন্ধনঃ ।
খরদূষণসংহারী সাকেতপুরবাসবান্ ॥ ৩৬॥

চন্দ্রাবলীপতিঃ কূলঃ কেশিকংসবধোঽমলঃ ।
মাধবো মধুহা মাধ্বী মাধ্বীকো মাধবো বিধুঃ ॥ ৩৭॥

মুঞ্জাটবীগাহমানঃ ধেনুকারির্ধরাত্মজঃ ।
বংশীবটবিহারী চ গোবর্ধনবনাশ্রয়ঃ ॥ ৩৮॥

তথা তালবনোদ্দেশী ভাণ্ডীরবনশঙ্খহা ।
তৃণাবর্তকৃপাকারী বৃষভানুসুতাপতিঃ ॥ ৩৯॥

রাধাপ্রাণসমো রাধাবদনাব্জমধুব্রতঃ ।
গোপীরঞ্জনদৈবজ্ঞঃ লীলাকমলপূজিতঃ ॥ ৪০॥

ক্রীডাকমলসন্দোহঃ গোপিকাপ্রীতিরঞ্জনঃ ।
রঞ্জকো রঞ্জনো রঙ্গো রঙ্গী রঙ্গমহীরুহঃ ॥ ৪১॥

কামঃ কামারিভক্তোঽযং পুরাণপুরুষঃ কবিঃ ।

নারদো দেবলো ভীমো বালো বালমুখাম্বুজঃ ॥ ৪২॥

অম্বুজো ব্রহ্মসাক্ষী চ যোগী দত্তবরো মুনিঃ ।

ঋষভঃ পর্বতো গ্রামো নদীপবনবল্লভঃ ॥ ৪৩॥

পদ্মনাভঃ সুরজ্যেষ্ঠী ব্রহ্মা রুদ্রোঽহিভূষিতঃ ।

গণানাং ত্রাণকর্তা চ গণেশো গ্রহিলো গ্রহী ॥ ৪৪॥

গণাশ্রয়ো গণাধ্যক্ষঃ ক্রোডীকৃতজগল্রয়ঃ ।

যাদবেন্দ্রো দ্বারকেন্দ্রো মথুরাবল্লভো ধুরী ॥ ৪৫॥

ভ্রমরঃ কুন্তলী কুন্তীসুতরক্ষো মহামখী ।

যমুনাবরদাতা চ কাশ্যপস্য বরপ্রদঃ ॥ ৪৬॥

শঙ্খচূডবধোদ্দামো গোপীরক্ষণতৎপরঃ ।

পাঞ্চজন্যকরো রামী ত্রিরামী বনজো জয়ঃ ॥ ৪৭॥

ফাল্গুনঃ ফাল্গুনসখো বিরাধবধকারকঃ ।

রুক্মিণীপ্রাণনাথশ্চ সত্যভামাপ্রিযঙ্করঃ ॥ ৪৮॥

কল্পবৃক্ষো মহাবৃক্ষঃ দানবৃক্ষো মহাফলঃ ।

অঙ্কুশো ভূসুরো ভাবো ভ্রামকো ভামকো হরিঃ ॥ ৪৯॥

সরলঃ শাশ্বতো বীরো যদুবংশী শিবাত্মকঃ ।

প্রদ্যুম্নো বলকর্তা চ প্রহর্তা দৈত্যহা প্রভুঃ ॥ ৫০॥

মহাধনী মহাবীরো বনমালাবিভূষণঃ ।

তুলসীদামশোভাঢ্যো জালন্ধরবিনাশনঃ ॥ ৫১॥

শূরঃ সূর্যো মৃতণ্ডশ্চ ভাস্করো বিশ্বপূজিতঃ ।

রবিস্তমোহা বহ্নিশ্চ বাডবো বডবানলঃ ॥ ৫২॥

দৈত্যদর্পবিনাশী চ গরুডো গরুডাগ্রজঃ ।

গোপীনাথো মহানাথো বৃন্দানাথোঽবিরোধকঃ ॥ ৫৩॥

প্রপঞ্চী পঞ্চরূপশ্চ লতাগুল্মশ্চ গোপতিঃ ।

গঙ্গা চ যমুনারূপো গোদা বেত্রবতী তথা ॥ ৫৪॥

কাবেরী নর্মদা তাপ্তী গণ্ডকী সরযূস্তথা ।

রাজসস্তামসস্সত্ত্বী সর্বাঙ্গী সর্বলোচনঃ ॥ ৫৫॥

সুধাময়োঽমৃতময়ো যোগিনীবল্লভঃ শিবঃ ।

বুদ্ধো বুদ্ধিমতাং শ্রেষ্ঠো বিষ্ণুর্জিষ্ণুঃ শচীপতিঃ ॥ ৫৬॥

বংশী বংশধরো লোকঃ বিলোকো মোহনাশনঃ ।

রবরাবো রবো রাবো বলো বালবলাহকঃ ॥ ৫৭॥

শিবো রুদ্রো নলো নীলো লাঙ্গলী লাঙ্গলাশ্রয়ঃ ।

পারদঃ পাবনো হংসো হংসারূঢো জগৎপতিঃ ॥ ৫৮॥

মোহিনীমোহনো মাযী মহামাযো মহামখী ।

বৃষো বৃষাকপিঃ কালঃ কালীদমনকারকঃ ॥ ৫৯॥

কুব্জাভাগ্যপ্রদো বীরঃ রজকক্ষযকারকঃ ।

কোমলো বারুণো রাজা জলজো জলধারকঃ ॥ ৬০॥

হারকঃ সর্বপাপঘ্নঃ পরমেষ্ঠী পিতামহঃ ।

খড্গধারী কৃপাকারী রাধারমণসুন্দরঃ ॥ ৬১॥

দ্বাদশারণ্যসম্ভোগী শেষনাগফণালযঃ ।

কামঃ শ্যামঃ সুখশ্রীদঃ শ্রীপতিঃ শ্রীনিধিঃ কৃতী ॥ ৬২॥

হরির্নারাযণো নারো নরোত্তম ইষুপ্রিযঃ ।

গোপালীচিত্তহর্তা চ কর্তা সংসারতারকঃ ॥ ৬৩॥

আদিদেবো মহাদেবো গৌরীগুরুরনাশ্রযঃ ।

সাধুর্মধুর্বিধুর্ধাতা ত্রাতাঽক্রূরপরাযণঃ ॥ ৬৪॥

রোলম্বী চ হযগ্রীবো বানরারির্বনাশ্রযঃ ।

বনং বনী বনাধ্যক্ষঃ মহাবন্দ্যো মহামুনিঃ ॥ ৬৫॥

স্যামন্তকমণিপ্রাজ্ঞো বিজ্ঞো বিঘ্নবিঘাতকঃ ।

গোবর্দ্ধনো বর্দ্ধনীযঃ বর্দ্ধনো বর্দ্ধনপ্রিযঃ ॥ ৬৬॥

বর্দ্ধন্যো বর্দ্ধনো বর্দ্ধী বার্দ্ধিষ্ণুঃ সুমুখপ্রিযঃ ।

বর্দ্ধিতো বৃদ্ধকো বৃদ্ধো বৃন্দারকজনপ্রিযঃ ॥ ৬৭॥

গোপালরমণীভর্তা সাম্বকুষ্ঠবিনাশকঃ ।

রুক্মিণীহরণঃ প্রেমপ্রেমী চন্দ্রাবলীপতিঃ ॥ ৬৮॥

শ্রীকর্তা বিশ্বভর্তা চ নরো নারাযণো বলী ।

গণো গণপতিশ্চৈব দত্তাত্রেযো মহামুনিঃ ॥ ৬৯॥

ব্যাসো নারাযণো দিব্যো ভব্যো ভাবুকধারকঃ ।

শ্বঃশ্রেযসং শিবং ভদ্রং ভাবুকং ভাবিকং শুভম্ ॥ ৭০॥

শুভাত্মকঃ শুভঃ শাস্তা প্রশাস্তা মেঘানাদহা ।

ব্রহ্মণ্যদেবো দীনানামুদ্ধারকরণক্ষমঃ ॥ ৭১॥

কৃষ্ণঃ কমলপত্রাক্ষঃ কৃষ্ণঃ কমললোচনঃ ।

কৃষ্ণঃ কামী সদা কৃষ্ণঃ সমস্তপ্রিয়কারকঃ ॥ ৭২ ॥

নন্দো নন্দী মহানন্দী মাদী মাদনকঃ কিলী ।

মিলী হিলী গিলী গোলী গোলো গোলালয়ো গুলী ॥ ৭৩॥

গুগ্গুলী মারকী শাখী বটঃ পিপ্পলকঃ কৃতী ।

ম্লেচ্ছহা কালহর্ত্তা চ যশোদাযশ এব চ ॥ ৭৪ ॥

অচ্যুতঃ কেশবো বিষ্ণুঃ হরিঃ সত্যো জনার্দনঃ ।

হংসো নারায়ণো লীলো নীলো ভক্তিপরায়ণঃ ॥ ৭৫ ॥

জানকীবল্লভো রামঃ বিরামো বিঘ্ননাশনঃ ।

সহভানুর্মহাভানুঃ বীরবাহুর্মহোদধিঃ ॥ ৭৬॥

সমুদ্রোঽব্ধিরকূপারঃ পারাবারঃ সরিৎপতিঃ ।

গোকুলানন্দকারী চ প্রতিজ্ঞাপরিপালকঃ ॥ ৭৭ ॥

সদারামঃ কৃপারামঃ মহারামো ধনুর্ধরঃ ।

পর্বতঃ পর্বতাকারো গয়ো গেয়ো দ্বিজপ্রিয়ঃ ॥ ৭৮ ॥

কম্বলাশ্বতরো রামো রামায়ণপ্রবর্তকঃ ।

দ্যৌর্দিবো দিবসো দিব্যো ভব্যো ভাবি ভয়াপহঃ ॥ ৭৯॥

পার্বতীভাগ্যসহিতো ভর্তা লক্ষ্মীবিলাসবান্ ।

বিলাসী সাহসী সর্বী গর্বী গর্বিতলোচনঃ ॥ ৮০॥

মুরারির্লোকধর্মজ্ঞঃ জীবনো জীবনান্তকঃ ।

যমো যমাদিযমনো যামী যামবিধাযকঃ ॥ ৮১॥

বসুলী পাংসুলী পাংসুঃ পাণ্ডুরর্জুনবল্লভঃ ।

ললিতা চন্দ্রিকামালী মালী মালাম্বুজাশ্রযঃ ॥ ৮২॥

অম্বুজাক্ষো মহাযজ্ঞঃ দক্ষঃ চিন্তামণিঃ প্রভুঃ ।

মণির্দিনমণিশ্চৈব কেদারো বদরীশ্রযঃ ॥ ৮৩॥

বদরীবনসম্প্রীতঃ ব্যাসঃ সত্যবতীসুতঃ ।

অমরারিনিহন্তা চ সুধাসিন্ধুবিধূদযঃ ॥ ৮৪॥

চন্দ্রো রবিঃ শিবঃ শূলী চক্রী চৈব গদাধরঃ ।

শ্রীকর্তা শ্রীপতিঃ শ্রীদঃ শ্রীদেবো দেবকীসুতঃ ॥ ৮৫॥

শ্রীপতিঃ পুণ্ডরীকাক্ষঃ পদ্মনাভো জগৎপতিঃ ।

বাসুদেবোঽপ্রমেযাত্মা কেশবো গরুডধ্বজঃ ॥ ৮৬॥

নারাযণঃ পরং ধাম দেবদেবো মহেশ্বরঃ ।

চক্রপাণিঃ কলাপূর্ণো বেদবেদ্যো দয়ানিধিঃ ॥ ৮৭॥

ভগবান্ সর্বভূতেশো গোপালঃ সর্বপালকঃ ।

অনন্তো নির্গুণো নিত্যো নির্বিকল্পো নিরঞ্জনঃ ॥ ৮৮॥

নিরাধারো নিরাকারঃ নিরাভাসো নিরাশ্রয়ঃ ।

পুরুষঃ প্রণবাতীতো মুকুন্দঃ পরমেশ্বরঃ ॥ ৮৯॥

ক্ষণাবনিঃ সার্বভৌমো বৈকুণ্ঠো ভক্তবৎসলঃ ।

বিষ্ণুর্দামোদরঃ কৃষ্ণো মাধবো মথুরাপতিঃ ॥ ৯০॥

দেবকীগর্ভসম্ভূতো যশোদাবৎসলো হরিঃ ।

শিবঃ সঙ্কর্ষণঃ শম্ভুর্ভূতনাথো দিবস্পতিঃ ॥ ৯১॥

অব্যয়ঃ সর্বধর্মজ্ঞঃ নির্মলো নিরুপদ্রবঃ ।

নির্বাণনায়কো নিত্যো নীলজীমূতসন্নিভঃ ॥ ৯২॥

কলাক্ষয়শ্চ সর্বজ্ঞঃ কমলারূপতৎপরঃ ।

হৃষীকেশঃ পীতবাসা বসুদেবপ্রিয়াত্মজঃ ॥ ৯৩॥

নন্দগোপকুমারার্যঃ নবনীতাশনো বিভুঃ ।

পুরাণপুরুষঃ শ্রেষ্ঠঃ শঙ্খপাণিঃ সুবিক্রমঃ ॥ ৯৪॥

অনিরুদ্ধশ্চক্ররথঃ শার্ঙ্গপাণিশ্চতুর্ভুজঃ ।
গদাধরঃ সুরার্তিঘ্নো গোবিন্দো নন্দকাযুধঃ ॥ ৯৫॥

বৃন্দাবনচরঃ শৌরির্বেণুবাদ্যবিশারদঃ ।
তৃণাবর্তান্তকো ভীমসাহসী বহুবিক্রমঃ ॥ ৯৬॥

শকটাসুরসংহারী বকাসুরবিনাশনঃ ।
ধেনুকাসুরসংহারী পূতনারির্নৃকেসরী ॥ ৯৭॥

পিতামহো গুরুস্সাক্ষাত্ প্রত্যগাত্মা সদাশিবঃ ।
অপ্রমেযঃ প্রভুঃ প্রাজ্ঞোঽপ্রতর্ক্যঃ স্বপ্নবর্দ্ধনঃ ॥ ৯৮॥

ধন্যো মান্যো ভবো ভাবো ধীরঃ শান্তো জগদ্গুরুঃ ।
অন্তর্যামীশ্বরো দিব্যো দৈবজ্ঞো দেবসংস্তুতঃ ॥ ৯৯॥

ক্ষীরাব্ধিশযনো ধাতা লক্ষ্মীবাংল্লক্ষ্মণাগ্রজঃ ।
ধাত্রীপতিরমেযাত্মা চন্দ্রশেখরপূজিতঃ ॥ ১০০॥

লোকসাক্ষী জগচ্চক্ষুঃ পুণ্যচারিত্রকীর্তনঃ ।
কোটিমন্মথসৌন্দর্যঃ জগন্মোহনবিগ্রহঃ ॥ ১০১॥

মন্দস্মিতাননো গোপো গোপিকাপরিবেষ্টিতঃ ।

ফুল্লারবিন্দনয়নঃ চাণূরান্ধ্রনিষূদনঃ ॥ ১০২॥

ইন্দীবরদলশ্যামো বর্হিবর্হাবতংসকঃ ।

মুরলীনিনদাহ্লাদঃ দিব্যমাল্যাম্বরাবৃতঃ ॥ ১০৩॥

সুকপোলযুগঃ সুভ্রূযুগলঃ সুললাটকঃ ।

কম্বুগ্রীবো বিশালাক্ষো লক্ষ্মীবাঞ্ছুভলক্ষণঃ ॥ ১০৪॥

পীনবক্ষাশ্চতুর্বাহুশ্চতুর্মূর্তিস্ত্রিবিক্রমঃ ।

কলঙ্করহিতঃ শুদ্ধঃ দুষ্টশত্রুনিবর্হণঃ ॥ ১০৫॥

কিরীটকুণ্ডলধরঃ কটকাঙ্গদমণ্ডিতঃ ।

মুদ্রিকাভরণোপেতঃ কটিসূত্রবিরাজিতঃ ॥ ১০৬॥

মঞ্জীররঞ্জিতপদঃ সর্বাভরণভূষিতঃ ।

বিন্যস্তপাদযুগলো দিব্যমঙ্গলবিগ্রহঃ ॥ ১০৭॥

গোপিকানয়নানন্দঃ পূর্ণচন্দ্রনিভাননঃ ।

সমস্তজগদানন্দঃ সুন্দরো লোকনন্দনঃ ॥ ১০৮॥

যমুনাতীরসঞ্চারী রাধামন্মথবৈভবঃ ।

গোপনারীপ্রিয়ো দান্তো গোপীবস্ত্রাপহারকঃ ॥ ১০৯॥

শৃঙ্গারমূর্তিঃ শ্রীধামা তারকো মূলকারণম্ ।
সৃষ্টিসংরক্ষণোপায়ঃ ক্রূরাসুরবিভঞ্জনঃ ॥ ১১০॥

নরকাসুরসংহারী মুরারিররিমর্দনঃ ।
আদিতেযপ্রিযো দৈত্যভীকরো যদুশেখরঃ ॥ ১১১॥

জরাসন্ধকুলধ্বংসী কংসারাতিঃ সুবিক্রমঃ ।
পুণ্যশ্লোকঃ কীর্তনীযঃ যাদবেন্দ্রো জগন্নুতঃ ॥ ১১২॥

রুক্মিণীরমণঃ সত্যভামাজাম্ববতীপ্রিযঃ ।
মিত্রবিন্দানাগ্নজিতীলক্ষ্মণাসমুপাসিতঃ ॥ ১১৩॥

সুধাকরকুলে জাতোঽনন্তপ্রবলবিক্রমঃ ।
সর্বসৌভাগ্যসম্পন্নো দ্বারকাপত্তনে স্থিতঃ ॥ ১১৪॥

ভদ্রাসূর্যসুতানাথো লীলামানুষবিগ্রহঃ ।
সহস্রষোডশস্ত্রীশো ভোগমোক্ষৈকদাযকঃ ॥ ১১৫॥

বেদান্তবেদ্যঃ সংবেদ্যো বৈদ্যো ব্রহ্মাণ্ডনাযকঃ ।
গোবর্দ্ধনধরো নাথঃ সর্বজীবদযাপরঃ ॥ ১১৬॥

মূর্তিমান্ সর্বভূতাত্মা আর্তত্রাণপরাযণঃ ।

সর্বজ্ঞঃ সর্বসুলভঃ সর্বশাস্ত্রবিশারদঃ ॥ ১১৭॥

ষড্গুণৈশ্বর্যসম্পন্নঃ পূর্ণকামো ধুরন্ধরঃ ।
মহানুভাবঃ কৈবল্যদাযকো লোকনাযকঃ ॥ ১১৮॥

আদিমধ্যান্তরহিতঃ শুদ্ধসাত্ত্বিকবিগ্রহঃ ।
অসমানঃ সমস্তাত্মা শরণাগতবৎসলঃ ॥ ১১৯॥

উৎপত্তিস্থিতিসংহারকারণং সর্বকারণম্ ।
গম্ভীরঃ সর্বভাবজ্ঞঃ সচ্চিদানন্দবিগ্রহঃ ॥ ১২০॥

বিষ্বক্সেনঃ সত্যসন্ধঃ সত্যবাক্ সত্যবিক্রমঃ ।
সত্যব্রতঃ সত্যরতঃ সর্বধর্মপরাযণঃ ॥ ১২১॥

আপন্নার্তিপ্রশমনঃ দ্রৌপদীমানরক্ষকঃ ।
কন্দর্পজনকঃ প্রাজ্ঞো জগন্নাটকবৈভবঃ ॥ ১২২॥

ভক্তিবশ্যো গুণাতীতঃ সর্বৈশ্বর্যপ্রদাযকঃ ।
দমঘোষসুতদ্বেষী বাণবাহুবিখণ্ডনঃ ॥ ১২৩॥

ভীষ্মভক্তিপ্রদো দিব্যঃ কৌরবান্বযনাশনঃ ।
কৌন্তেযপ্রিযবন্ধুশ্চ পার্থস্যন্দনসারথিঃ ॥ ১২৪॥

নারসিংহো মহাবীরঃ স্তম্ভজাতো মহাবলঃ ।

প্রহ্লাদবরদঃ সত্যো দেবপূজ্যোঽভযঙ্করঃ ॥ ১২৫॥

উপেন্দ্র ইন্দ্রাবরজো বামনো বলিবন্ধনঃ ।

গজেন্দ্রবরদঃ স্বামী সর্বদেবনমস্কৃতঃ ॥ ১২৬॥

শেষপর্যঙ্কশযনঃ বৈনতেযরথো জযী ।

অব্যাহতবলৈশ্বর্যসম্পন্নঃ পূর্ণমানসঃ ॥ ১২৭॥

যোগেশ্বরেশ্বরঃ সাক্ষী ক্ষেত্রজ্ঞো জ্ঞানদাযকঃ ।

যোগিহৃৎপঙ্কজাবাসো যোগমাযাসমন্বিতঃ ॥ ১২৮॥

নাদবিন্দুকলাতীতশ্চতুর্বর্গফলপ্রদঃ ।

সুষুম্নামার্গসঞ্চারী দেহস্যান্তরসংস্থিতঃ ॥ ১২৯॥

দেহেন্দ্রিযমনঃপ্রাণসাক্ষী চেতঃপ্রসাদকঃ ।

সূক্ষ্মঃ সর্বগতো দেহী জ্ঞানদর্পণগোচরঃ ॥ ১৩০॥

তত্ত্বত্রযাত্মকোঽব্যক্তঃ কুণ্ডলী সমুপাশ্রিতঃ ।

ব্রহ্মণ্যঃ সর্বধর্মজ্ঞঃ শান্তো দান্তো গতক্লমঃ ॥ ১৩১॥

শ্রীনিবাসঃ সদানন্দঃ বিশ্বমূর্তির্মহাপ্রভুঃ ।

সহস্রশীর্ষা পুরুষঃ সহস্রাক্ষঃ সহস্রপাত্ ॥ ১৩২॥

সমস্তভুবনাধারঃ সমস্তপ্রাণরক্ষকঃ ।

সমস্তসর্বভাবজ্ঞো গোপিকাপ্রাণবল্লভঃ ॥ ১৩৩॥

নিত্যোৎসবো নিত্যসৌখ্যো নিত্যশ্রীর্নিত্যমঙ্গলঃ ।

ব্যূহার্চিতো জগন্নাথঃ শ্রীবৈকুণ্ঠপুরাধিপঃ ॥ ১৩৪॥

পূর্ণানন্দঘনীভূতঃ গোপবেষধরো হরিঃ ।

কলাপকুসুমশ্যামঃ কোমলঃ শান্তবিগ্রহঃ ॥ ১৩৫॥

গোপাঙ্গনাবৃতোঽনন্তো বৃন্দাবনসমাশ্রয়ঃ ।

বেণুবাদরতঃ শ্রেষ্ঠো দেবানাং হিতকারকঃ ॥ ১৩৬॥

বালক্রীডাসমাসক্তো নবনীতস্য তস্করঃ ।

গোপালকামিনীজারশ্চৌরজারশিখামণিঃ ॥ ১৩৭॥

পরঞ্জ্যোতিঃ পরাকাশঃ পরাবাসঃ পরিস্ফুটঃ ।

অষ্টাদশাক্ষরো মন্ত্রো ব্যাপকো লোকপাবনঃ ॥ ১৩৮॥

সপ্তকোটিমহামন্ত্রশেখরো দেবশেখরঃ ।

বিজ্ঞানজ্ঞানসন্ধানস্তেজোরাশির্জগৎপতিঃ ॥ ১৩৯॥

ভক্তলোকপ্রসন্নাত্মা ভক্তমন্দারবিগ্রহঃ ।

ভক্তদারিদ্র্যদমনো ভক্তানাং প্রীতিদায়কঃ ॥ ১৪০॥

ভক্তাধীনমনাঃ পূজ্যঃ ভক্তলোকশিবঙ্করঃ ।

ভক্তাভীষ্টপ্রদঃ সর্বভক্তাঘৌঘনিকৃন্তনঃ ॥ ১৪১॥

অপারকরুণাসিন্ধুর্ভগবান্ ভক্ততৎপরঃ ॥ ১৪২॥

॥ ইতি গোপাল সহস্রনামস্তোত্রম্ সম্পূর্ণম্ ॥

ফলশ্রুতিঃ

(॥ গোপালসহস্রনাম মাহাত্ম্যম্ ॥)

স্মরণাত্ পাপরাশীনাং খণ্ডনং মৃত্যুনাশনম্ ॥ ১ ॥

বৈষ্ণবানাং প্রিয়করং মহারোগনিবারণম্ ।

ব্রহ্মহত্যাসুরাপানং পরস্ত্রীগমনং তথা ॥ ২ ॥

পরদ্রব্যাপহরণং পরদ্বেষসমন্বিতম্ ।

মানসং বাচিকং কায়ং যৎপাপং পাপসম্ভবম্ ॥ ৩ ॥

সহস্রনামপঠনাত্ সর্বং নশ্যতি তৎক্ষণাত্ ।

মহাদারিদ্র্যযুক্তো যো বৈষ্ণবো বিষ্ণুভক্তিমান্ ॥ ৪ ॥

কার্তিক্যাং সম্পঠেদ্রাত্রৌ শতমষ্টোত্তরং ক্রমাত্ ।

পীতাম্বরধরো ধীমান্ সুগন্ধৈঃ পুষ্পচন্দনৈঃ ॥ ৫ ॥

পুস্তকং পূজযিত্বা তু নৈবেদ্যাদিভিরেব চ ।

রাধাধ্যানাঙ্কিতো ধীরো বনমালাবিভূষিতঃ ॥ ৬ ॥

শতমষ্টোত্তরং দেবি পঠেন্নামসহস্রকম্ ।

চৈত্রশুক্লে চ কৃষ্ণে চ কুহূসঙ্ক্রান্তিবাসরে ॥ ৭ ॥

পঠিতব্যং প্রযত্নেন ত্রৈলোক্যং মোহযেত্ ক্ষণাত্ ।

তুলসীমালযা যুক্তো বৈষ্ণবো ভক্তিতৎপরঃ ॥ ৮ ॥

রবিবারে চ শুক্রে চ দ্বাদশ্যাং শ্রাদ্ধবাসরে ।

ব্রাহ্মণং পূজযিত্বা চ ভোজযিত্বা বিধানতঃ ॥ ৯ ॥

পঠেন্নামসহস্রং চ ততঃ সিদ্ধিঃ প্রজাযতে ।

মহানিশাযাং সততং বৈষ্ণবো যঃ পঠেত্ সদা ॥ ১০ ॥

দেশান্তরগতা লক্ষ্মীঃ সমাযাতি ন সংশযঃ ।

ত্রৈলোক্যে চ মহাদেবি সুন্দর্যঃ কামমোহিতাঃ ॥ ১১ ॥

মুগ্ধাঃ স্বযং সমাযান্তি বৈষ্ণবং চ ভজন্তি তাঃ ।

রোগী রোগাত্ প্রমুচ্যেত বদ্ধো মুচ্যেত বন্ধনাত্ ॥ ১২॥

গুর্বিণী জনযেৎপুত্রং কন্যা বিন্দতি সৎপতিম্ ।

রাজানো বশ্যতাং যান্তি কিং পুনঃ ক্ষুদ্রমানবাঃ ॥ ১৩॥

সহস্রনামশ্রবণাত্ পঠনাত্ পূজনাত্ প্রিযে ।

ধারণাত্ সর্বমাপ্নোতি বৈষ্ণবো নাত্র সংশযঃ ॥ ১৪॥

বংশীবটে চান্যবটে তথা পিপ্পলকেঽথ বা ।

কদম্বপাদপতলে গোপালমূর্তিসংনিধৌ ॥ ১৫।

যঃ পঠেদ্বৈষ্ণবো নিত্যং স যাতি হরিমন্দিরম্ ।

কৃষ্ণেনোক্তং রাধিকাযৈ মযা প্রোক্তং তথা শিবে ॥ ১৬॥

নারদায মযা প্রোক্তং নারদেন প্রকাশিতম্ ।

মযা তুভ্যং বরারোহে প্রোক্তমেতৎসুদুর্লভম্ ॥ ১৭॥

গোপনীযং প্রযত্নেন ন প্রকাশ্যং কথংচন ।

শঠায পাপিনে চৈব লম্পটায বিশেষতঃ ॥ ১৮॥

ন দাতব্যং ন দাতব্যং ন দাতব্যং কদাচন ।

দেযং শিষ্যায শান্তায বিষ্ণুভক্তিরতায চ ॥ ১৯॥

গোদানব্রহ্মযজ্ঞাদের্বাজপেযশতস্য চ ।

অশ্বমেধসহস্রস্য ফলং পাঠে ভবেত্ ধ্রুবম্ ॥ ২০॥

মোহনং স্তম্ভনং চৈব মারণোচ্চাটনাদিকম্ ।

যদ্যদ্বাঞ্ছতি চিত্তেন তত্তৎপ্রাপ্নোতি বৈষ্ণবঃ ॥ ২১॥

একাদশ্যাং নরঃ স্নাত্বা সুগন্ধিদ্রব্যতৈলকৈঃ ।

আহারং ব্রাহ্মণে দত্ত্বা দক্ষিণাং স্বর্ণভূষণম্ ॥ ২২॥

তত আরম্ভকর্তাস্য সর্বং প্রাপ্নোতি মানবঃ ।

শতাবৃত্তং সহস্রং চ যঃ পঠেদ্বৈষ্ণবো জনঃ ॥ ২৩॥

শ্রীবৃন্দাবনচন্দ্রস্য প্রসাদাৎসর্বমাপ্নুযাত্ ।

যদ্গৃহে পুস্তকং দেবি পূজিতং চৈব তিষ্ঠতি ॥ ২৪॥

ন মারী ন চ দুর্ভিক্ষং নোপসর্গভযং ক্বচিত্ ।

সর্পাদ্যা ভূতযক্ষাদ্যা নশ্যন্তে নাত্র সংশযঃ ॥ ২৫॥

শ্রীগোপালো মহাদেবি বসেত্তস্য গৃহে সদা ।

গৃহে যত্র সহস্রং চ নাম্নাং তিষ্ঠতি পূজিতম্ ॥ ২৬॥

॥ ওঁ তৎসদিতি শ্রীসম্মোহনতন্ত্রে পার্বতীশ্বরসংবাদে

গোপালসহস্রনামস্তোত্রং সম্পূর্ণম্ ॥

শ্রীরাধারমণঃ কৃষ্ণঃ গুণরত্নৈস্সুগুম্ফিতাম্ ।

স্বীকৃত্যেমাং মিতাং মালাং স নো বিষ্ণুঃ প্রসীদতু ॥

Addendum for prayers

শ্রী গোপালসহস্রনাম শাপবিমোচনমহামন্ত্রম্

ॐ অস্য শ্রীগোপালসহস্রনাম শাপবিমোচনমহামন্ত্রস্য বামদেবঋষিঃ ।

শ্রীগোপালো দেবতা পঙ্ক্তিঃ ছন্দঃ ।

শ্রী সদাশিববাক্য শাপবিমোচনার্থং জপে বিনিযোগঃ ।

ঋষ্যাদিন্যাসঃ

বামদেব ঋষযে নমঃ শিরসি ।

গোপাল দেবতাযৈ নমঃ হৃদযে ।

পঙ্ক্তি ছন্দসে নমঃ মুখে ।

সদাশিববাক্য শাপবিমুক্ত্যর্থং নমঃ সর্বাঙ্গে ॥

অথ করাদিন্যাসঃ

ॐ ঐং অঙ্গুষ্ঠাভ্যাং নমঃ ॥

ওঁ ক্লীং তর্জনীভ্যাং নমঃ ॥

ওঁ হ্রীং মধ্যমাভ্যাং নমঃ ॥

ওঁ শ্রীং অনামিকাভ্যাং নমঃ ॥

ওঁ বামদেবায কনিষ্ঠিকাভ্যাং নমঃ ॥

ওঁ নমঃ স্বাহা করতলকরপৃষ্ঠাভ্যাং নমঃ ॥

অথ হৃদযাদিন্যাসঃ

ওঁ ঐং হৃদযায নমঃ ॥

ওঁ ক্লীং শিরসি স্বাহা ॥

ওঁ হ্রীং শিখাযৈ বষট্ ॥

ওঁ শ্রীং কবচায হুম্ ॥

ওঁ বামদেবায নেত্রত্রযায বৌষট্ ॥

ওঁ নমঃ স্বাহা অস্ত্রায ফট্ ॥

অথ ধ্যানম্

ওঁ ধ্যাযেদ্দেবং গুণাতীতং পীতকৌশেযবাসসম্ ।

প্রসন্নং চারুবদনং চ নির্গুণং শ্রীপতিং প্রভুম্ ॥

মন্ত্রঃ

ওঁ ঐং ক্লীং হ্রীং শ্রীং বামদেবায নমঃ (স্বাহা)।

Proofread by PSA Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gopala Sahasranama Stotram Lyrics in Bengali PDF
% File name : gopaalasahasra.itx
% Category : sahasranAma
% Location : doc_vishhnu
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Converted from webdunia
% Proofread by : Proofread by PSA Easwaran psaeaswaran at gmail.com
% Latest update : March 12, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website